Naveen Shodh Sansar (An International Refereed / Peer Review Multidisciplinary Research Journal)
RNI No.- MPHIN/2013/60638, ISSN 2320-8767, E- ISSN 2394-3793, Scientific Journal Impact Factor (SJIF)- 8.054,
April to June 2026, E-Journal, Vol. I, Issue LIV (54), ISO 9001:2015 - E2024049304 (QMS)

आधुनिक प्रबन्धनार्थं शाश्वतं गीता ज्ञानम्

डॉ. पंकज कुमार सिंह*

* सहा. आचार्य (संस्कृत) श्रीमती एल.डी.एस.पी.ए.एस. कॉलेज, बरुंदनी, भीलवाड़ा (राज.) भारत

प्रस्तावना – भगवद्गीता भारतीयसंस्कृते: परमं रत्नं अस्ति । एषा गीता केवलं धार्मिकग्रन्थ: न, अपितु जीवनस्य प्रत्येकं क्षेत्रं प्रति मार्गदर्शनं करोति। महाभारतस्य भीष्मपर्वे स्थितेऽस्मिन् ग्रन्थे श्रीकृष्ण: अर्जुनं प्रति योद्धा रूपेण आत्मज्ञानं, धर्म च बोधयति। भगवद्गीताया: शिक्षा: केवलं युद्धस्य सीमिता: न सन्ति, अपितु सर्वेषां मानवजीवनस्य क्षेत्रेषु उपयुक्ता: भवन्ति।

भगवद्गीताया: प्रामुख्यं:

भगवद्गीता आत्मस्वरूपं, कर्मयोगं, भक्तियोगं, ज्ञानयोगं च प्रतिपादयति । एषा गीता मानवं जीवनस्य कर्तव्यं प्रति जागरूकं करोति। गीता अस्माकं मनोवृत्तिं संयमयितुं, कर्तव्यनिष्ठां स्थिरं कर्तु च समर्था अस्ति।

गीता धर्मस्य परिभाषां ददाति –

'स्वधर्मे निधनं श्रेय: परधर्मो भयावह: ।'(अध्याय: 3.35)

स्वधर्मे स्थिति: एव श्रेष्ठा इति गीता प्रतिपादयति। स्वकर्माणि श्रद्धया, नि:स्वार्थेन च कर्तव्यानि इति श्रीकृष्ण: अर्जुनं प्रति उपदिशति।

कर्मयोगस्य शिक्षा:

गीता कर्मयोगस्य उपदेशं ददाति –

'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।' (अध्याय: 2.47)

अर्थात् मानवस्य केवलं कर्मणि अधिकार: अस्ति, किन्तु फलेषु कदापि न । नि:स्वार्थकर्मेण एव परमगति प्राप्यते। गीता सन्देशं ददाति यत् मनुष्य: केवलं कर्तव्यं कृत्वा फलस्य आशा त्यक्तुं शक्नोति ।

भक्तियोगस्य शिक्षा:

गीता भक्तियोगं प्रतिपादयति यत्र भगवान् प्रति अनन्यभक्ति: परमं साधनं भवति ।

'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।'(अध्याय: 9.34)

श्रीकृष्ण: उपदिशति यत् भक्त्या एव मोक्ष: प्राप्यते । भक्ति: आत्मसमर्पणं, श्रद्धा च आवश्यके ।

ज्ञानयोगस्य शिक्षा:

गीता आत्मज्ञानस्य महत्वं प्रतिपादयति–

'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।' (अध्याय: 4.38)

ज्ञानं परमं शुद्धिकरणं भवति । आत्मस्वरूपस्य ज्ञानं एव मोक्षस्य मार्ग: इति गीता प्रतिपादयति ।

समत्वस्य शिक्षा:

भगवद्गीता समत्वं प्रतिपादयति–

'समत्वं योग उच्यते।' (अध्याय: 2.48)

सुखदु:खयो: समत्वं धारयन्ति ते योगिन: इति श्रीकृष्ण: अर्जुनाय उपदिशति।

संन्यासस्य शिक्षा:

गीता संन्यासस्य महत्वं प्रतिपादयति –

'य: सर्वत्रानभिस्नेहस्ततत्प्राप्य शुभाशुभम्।' (अध्याय: 2.57)

त्यागेन एवं परमसुखं लभ्यते। नि:स्वार्थकर्म, त्याग: समत्वं च गीता उपदिशति ।

भगवद्गीताया: प्रभाव:

भगवद्गीता केवलं धार्मिकग्रन्थ: न, अपितु जीवनस्य विविधक्षेत्रेषु मार्गदर्शिका अस्ति। अर्जुनस्य विषादस्य समये श्रीकृष्णेन प्रदतं मार्गदर्शनं अद्यापि सर्वेषु संकटेषु प्रासंगिकं भवति। गीता आत्मविश्वास, धैर्यं च प्रबोधयति ।

भगवद्गीता आत्मज्ञानस्य, कर्तव्यस्य, भक्ते: संन्यासस्य च उत्तामं स्रोत: अस्ति। एषा गीता मानवं धर्मस्य, कर्तव्यस्य, मोक्षस्य च मार्ग प्रदर्शयति। आजीवनं गीता अस्माकं चिन्तनं, कर्तव्यं च संमार्गे स्थापयति। एषा गीता मार्गदर्शिका इव सर्वेषां जीवनस्य दिशा प्रदर्शयति । अत: भगवद्गीता मार्गदर्शिका इति निरुपणं सम्यक् अस्ति ।

भगवद्गीता केवलं धार्मिकग्रन्थ: नास्ति, अपितु जीवनस्य यथार्थमार्गदर्शनं तथा प्रबन्धनस्य अद्भुतस्रोत: अस्ति। भगवद्गीतायां निहितानि उपदेशा: केवलं आध्यात्मिक उन्नतिम् एव न दर्शयन्ति, अपि तु सामाजिक, व्यवसायिक तथा व्यक्तिगत जीवनस्य प्रबन्धने अपि परमोपयोगिन: सन्ति। भगवद्गीता कर्मयोगस्य, ज्ञानयोगस्य, भक्तियोगस्य च सिद्धान्तानाम् आधार: अस्ति, य: कुशलप्रबन्धकाय मार्गदर्शक: भवति ।

प्रबन्धनस्य स्वरूपं भगवद्गीतायां तस्य महत्वं च

प्रबन्धनस्य अर्थ: अस्ति साधनानां सम्यक् उपयोगेन लक्ष्यानां प्राप्ति: आधुनिकप्रबन्धनसिद्धान्तस्य मूलतत्वानि–योजना, संगठनम् , निर्देशनम्, समन्वय: तथा नियंत्रणम् इत्यादय: भगवद्गीतायां स्पष्टतया दर्शिता: सन्ति। भगवान् श्रीकृष्ण: अर्जुनं कर्मयोगस्य माध्यमेन कुशलप्रबन्धनस्य पथं दर्शितवान् –

'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।।'
(भगवद्गीता 2.47)

अस्य अर्थ: – ते अधिकार: कर्मणि एव अस्ति, फलेषु कदाचन नास्ति । अत: फलस्य अपेक्षाया बिना स्वधर्मे स्थित: भव।

एष: श्लोक: प्रबन्धनस्य मूलसिद्धान्तं प्रतिपादयति य: कर्मे समर्पणं करोति, फलस्य चिन्ता न करोति स:

श्रेष्ठप्रबन्धक: भवति ।

नेतृत्वस्य सिद्धान्ता:

भगवद्गीतायां भगवान् श्रीकृष्ण: अर्जुनं श्रेष्ठनेतृत्वस्य पाठं अदिशत्। उत्तम: नेता स: भवति य: समदर्शी, सहिष्णु:, धैर्यशील: च भवति । श्रीकृष्ण: उक्तवान्–

'यद्यदाचरति श्रेष्ठस्तत्तादेवेतरो जन: ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।'
(भगवद्गीता 3.21)

अस्य अर्थ: – य: श्रेष्ठ: जन: यत् आचरणं करोति, तस्य अनुसरणं अन्ये जना: कुर्वन्ति ।

एष: श्लोक: नेतृत्वस्य आधारभूतं सिद्धान्तं प्रतिपादयति । उत्तम: नेता स: भवति य: स्वं आचरणं उदाहरणरूपेण स्थापयति ।

निर्णय–निर्माणस्य सिद्धान्ता:

प्रबन्धनस्य महत्त्वपूर्णतत्त्वं निर्णय निर्माणं अस्ति । भगवान् श्रीकृष्ण: अर्जुनं अविद्या मोह–भ्रमात् विमुक्त: सञ्जात्वा विवेकपूर्वकं निर्णयं कर्तु प्रेरितवान्–

'विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ।।'
(भगवद्गीता 18.63)

अस्य अर्थ: एतद् सम्यक् विचार्य यथा इच्छसि तथा कुरु ।

एष: श्लोक: निर्णयस्य पूर्वे सम्यक् विश्लेषणं तथा यथार्थनिर्णयस्य आवश्यकतां प्रतिपादयति । कुशल: प्रबन्धक: स: भवति य: बुद्धिपूर्वकं निर्णयं करोति ।

प्रेरणाया: तथा दलभावस्य सिद्धान्त:

प्रबन्धनै प्रेरणाया: तथा दलभावस्य विशेषं महत्वं अस्ति । **भगवान् श्रीकृष्ण: अर्जुनं स्वधर्मे प्रेरितवान्–**

'स्वधर्मे निधनं श्रेय: परधर्मो भयावह: ।।'
(भगवद्गीता 3.35)

अस्य अर्थ: – स्वधर्मे निधनं श्रेयस्करं भवति, परधर्म: तु भयावह: अस्ति ।

एष: श्लोक: स्वकर्तव्ये समर्पणं तथा अनुशासनस्य भावनां प्रबन्धनस्य प्रेरणाया: मूलं प्रतिपादयति ।

संकट प्रबन्धनस्य सिद्धान्ता:

प्रबन्धने संकटस्य समये समभावस्य तथा धैर्यस्य आवश्यकं भवति । भगवद्गीतायां भगवान् श्रीकृष्ण: अर्जुनं संकटे स्थितप्रज्ञ: भवितुं प्रेरितवान्–

'सम: शत्रौ च मित्रे च तथा मानापमानयो: ।
शीतोष्णसुखदु:खेषु सम: सङ्गविवर्जित:।।'
(भगवद्गीता 12.18)

अस्य अर्थ: शत्रौ च मित्रे च मानापमानयो: च, शीतोष्णे सुखदु:खयो: च सम: भव

एष: श्लोक: संकट प्रबन्धनस्य सिद्धान्तं प्रतिपादयति । य: व्यक्ति समत्वेन स्थितप्रज्ञ: भवति स: संकटे सफलतया प्रबन्धयति ।

संगठनात्मक व्यवहारस्य सिद्धान्त:

भगवद्गीतायां संगठनात्मक व्यवहारस्य मूलं कर्मयोग: अस्ति। श्रीकृष्ण: उक्तवान् –

'योगस्थ: कुरु कर्माणि सगं त्यक्त्वा धनञ्जय ।
सिद्धयसिद्धयो: समो भूत्वा समत्वं योग उच्यते ।।'
(भगवद्गीता 2.4)

अस्य अर्थ: योगस्थ: स्थित: सन, आसक्ति त्यक्त्वा, सफलता–असफलतयो: समभावं धारयित्वा कर्म कुरु ।

एष: श्लोक: संगठनात्मक व्यवहारस्य सिद्धान्तं प्रतिपादयति उत्तम: प्रबन्धक: स: भवति य: सफलता–असफलतयो: समभावं धारयति ।

समयप्रबन्धनम्

समय: जीवनस्य अमूल्यं धनम्। गीता आलस्यस्य निन्दां करोति तथा कर्मशीलतां प्रशंसति।

'नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मण:।' (3।8)

य: समये कार्य सम्पन्नं करोति, स: सफल: भवति। विलम्ब: संस्थाया: प्रगतिं बाधते। अत: समयपालनम् आधुनिकप्रबन्धनस्य प्रमुखं तत्तवम् अस्ति।

दलकार्यस्य महत्त्वम्

महाभारते पाण्डवानां विजय: केवलम् व्यक्तिगतपराक्रमेण न, अपितु सामूहिकप्रयत्नेन अभवत। श्रीकृष्ण: सर्वेषां मध्ये समन्वयं स्थापितवान।

आधुनिकसंस्थायाम् अपि विभागानां समन्वय:, परस्परविश्वास:, सहयोग:, संवाद: च अत्यावश्यका:। दलभावनया संस्था दृढा भवति।

नैतिकप्रबन्धनम्

गीता धर्मस्य, सत्यस्य, न्यायस्य, नि:स्वार्थसेवाया: च महत्त्वं प्रतिपादयति। नैतिकतां विना प्राप्ता सफलता स्थायिनी न भवति।

भ्रष्टाचार:, असत्यं, लोभ:, अन्याय: च संस्थाया: पतनस्य कारणानि भवन्ति। अत: नैतिकमूल्याधारितं प्रबन्धनमेव स्थायिविकासस्य मार्ग:।

तनावप्रबन्धनम्

आधुनिकजीवने स्पर्धा, कार्यभार:, समयाभाव: इत्यादिभि: मानसिकतनाव: वर्धते। गीता धैर्य, ध्यानम्, आत्मविश्वासं, ईश्वरविश्वासं च शिक्षयति। एते गुणा: मन: शान्तं कुर्वन्ति तथा कार्यदक्षतां वर्धयन्ति।

परिवर्तनस्य स्वीकृति:

जगत: स्वभाव: परिवर्तनम् एव। गीता परिवर्तनस्य स्वाभाविकतां बोधयति। य: परिवर्तनानुकूलं स्वव्यवहारं परिवर्तयति, स: एव प्रगतिं प्राप्नोति। आधुनिकव्यवसाये नूतनप्रौद्योगिकी, नूतननीतय:, वैश्विकस्पर्धा च निरन्तरं परिवर्तन्ते। गीता परिवर्तनं धैर्येण स्वीकर्तु प्रेरयति।

सामाजिकउत्तरदायित्वम्

संस्थाया: लक्ष्यं केवलं लाभार्जनं न भवेत। समाजसेवा, पर्यावरणसंरक्षणम्, कर्मचारीकल्याणम्, नैतिकव्यापार: च तस्या: उत्तरदायित्वानि सन्ति। गीता लोकसंग्रहस्य भावं प्रतिपादयति–

'लोकसंग्रहमेवापि सम्पश्यन् कर्तुमर्हसि।' (3।20)

अर्थात् समाजहिताय कृतं कर्म एव श्रेष्ठम्।

वैश्विकसन्दर्भे गीताया: प्रासङ्गिकता

अद्य विश्वस्य अनेका: प्रबन्धनविशेषज्ञा: भगवद्गीताया: सिद्धान्तानां अध्ययनं कुर्वन्ति। नेतृत्वविकास:, नैतिकव्यवसाय:, मानवसंसाधन प्रबन्धनम्, तनावप्रबन्धनम्, प्रेरणाशास्त्रम् इत्यादिषु गीताया: सिद्धान्ता: व्यापकं प्रभावं जनयन्ति। गीता भारतीयज्ञानपरम्पराया: वैश्विकमहत्त्वं प्रतिपादयति।

उपसंहार:

भगवद्गीता मध्ये प्रतिपादिता: प्रबन्धनस्य सिद्धान्ता: आजपर्यन्तं आधुनिकप्रबन्धनशास्त्रे अत्यन्तं प्रासङ्गिका: सन्ति। कर्मयोग:, नेतृत्वं, निर्णयनिर्माणं, प्रेरणा, संकट प्रबन्धनं, संगठनात्मक व्यवहारं च भगवद्गीतायां स्पष्टतया प्रतिपादितानि सन्ति। भगवद्गीताया: प्रबन्धनसिद्धान्ता: न केवलं व्यक्तिगतं विकास अपितु संगठनात्मकं सामाजिक च विकास मार्गदर्शयन्ति भगवद्गीताया: संदेश: अस्ति कर्तव्यं कुरु, फलस्य चिन्ता मा कार्षी: एष एव सच्च प्रबन्धनं ।